शास्त्री प्रथम वर्षस्य कृते (साहित्यम्)

## चतुर्वर्ग फलप्राप्तये वेदादिषु सत्सु काव्यस्य कियानुपयोगः ।

नन्तु 'वेदाभ्यासोऽध्येतव्यः' चतुर्वर्ग पुरुषार्थं साधनत्वं प्रतीयते, विश्वनाथेन तु चतुर्वर्ग फल प्राप्तिः काव्यादेवेति उच्यते । अत्राह- चतुर्वर्गफल प्राप्तये द्वौ पन्थानौ । एकः वेदादिः, अपरश्च काव्यम् । ते ये परिपक्व बुद्धयः सन्ति तेभ्यो वेदादि शास्त्रेभ्यो नीरसतया दुःखादेव चतुर्वर्गफल प्राप्तिर्भवति । किन्तु ये सुकुमार मतयः सन्ति ते नीरसानां शास्त्राणामध्ययने असमर्थाः भवन्ति । तेभ्यः चतुर्वर्ग फल प्राप्तये काव्य शास्त्रमेव विहितम् । कथं तु काव्य शास्त्रेण कान्तासम्मितयोपदेशेन परमानन्द सन्दोह-जनकतया सुखादेव चतुर्वर्गफलप्राप्तिः ।

ननु तर्हि परिणत बुद्धिभिः सत्सु वेद शास्त्रेषु किमिति काव्ये यत्नः करणीयः इत्यपि न वक्तव्यम् । कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिनः सितशर्करा प्रवृत्तिः साधुतरा न स्यात् ।। अतः 'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत' इति सूक्तिं 'काव्य शास्त्र विनोदेन कालो गच्छति धीमताम्' इति सूक्तिमनुसृत्य परिणत बुद्धिभिरपि चतुर्वर्ग फल प्राप्तये काव्य शास्त्रस्य परिशीलनं कर्तव्यमेवेति । वेद शास्त्रे प्रज्ञा साध्यः चतुर्वर्ग फलः (धर्मार्थकाम मोक्षः) प्राप्तिः किन्तु काव्य शास्त्रे सुकुमार मतीनामपि अल्पधियामपि धर्मार्थकाममोक्षस्य प्राप्तिः अति सुलभतया भवतीति निश्चितम् ।

इतिदिक्

अभय झा
6/7/20
एसो० प्रो० साहित्य
रा० उ० सं० महा० सुखसेना
पूर्णियाँ ।

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

साहित्यदर्पणः प्रथमः परिच्छेदः

रसात्मक वाक्यस्य काव्यत्वाङ्गीकारे, वाक्यस्य न दर्शन योग्यता, इति कथं काव्यस्य दृश्यत्व सिद्धिरिति विचार प्रदर्शनम् । अपि च काव्यस्य ध्वनिर्गुणीभूत व्यङ्ग्य दृश्य श्रव्यभेदैश्च चातुर्विध्यात् काव्यं चतुर्धा, इति कुतो नोक्तम् ? इति विचार प्रदर्शनम् ।

'वाक्यं रसात्मकं काव्यमिति' काव्य लक्षणम् तत्र वाक्यस्य काव्यत्वाङ्गीकारे, तस्य च वाक्यस्य दर्शन योग्यत्वात् कथं काव्यस्य दृश्यभेद सिद्धिरिति चेत्? न । वाक्यस्य पद समूहत्वेन पदस्य च विभक्ति विशिष्ट शब्द रूपत्वेन शब्दार्थयोश्चाभिन्नत्वात् वाक्यस्यापि शब्दात्मकत्वार्थात्मकत्व स्वीकारेण तत्र शब्दतात्पर्येण श्रव्य भेदस्य अर्थ तात्पर्येण च दृश्य भेदस्य सिद्धिः ।

काव्यस्यैव 'चातुर्विध्यस्य सत्त्वात्, कथमेकत्र द्वयोः ध्वनि गुणीभूत व्यङ्ग्ययोः, अपरत्र दृश्य श्रव्ययोश्च पृथक्-पृथक् निर्देश इति चेत् ! श्रूयताम्- काव्यस्य रसात्मक वाक्यत्वाद् रसस्य च चमत्कारसारत्वाद्, चमत्कारस्य च कुत्रचिदुत्तमत्वं कुत्रचिन्मध्यमत्वं इति चमत्कार वैविध्येन काव्यस्य ध्वनिर्गुणीभूतव्यङ्ग्यं चेति भेद द्वयं पृथक्निर्दिष्टम्

अपरं च काव्यं वाक्यम् । वाक्यं च पद समूहः । पदं च शब्दरूपम् । 'घटः' इत्ययं शब्दः, घटः इत्ययमर्थः इति शब्दार्थयोरभेद व्यवहार दर्शनेन शब्दस्य श्रव्यत्वम्, अर्थस्य च दृश्यत्वं सिध्यति । तत्र दृश्य काव्येन अभिनयादिना काव्यार्थ बोधः । श्रव्यकाव्येन उपदेशादिनेति उभयोर्भेदः । अतोऽयं काव्य शरीर निर्धारिको भेद द्वयोः पृथक्-पृथक् परिगणनमिति दिक् ।

उपेन्द्र झा

4/7/20

सहा० प्रो० साहित्य

रा० उ० शं० महावि०

[illegible]

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)

साहित्यदर्पणः नवम परिच्छेदः

रीति नियतानां रचनादीनां व्यत्ययः कथं भवति?
अथवा
'क्वचित्तु 'वक्त्राद्यौचित्याद् अन्यथा रचनादयः' इति कारिकायाः व्याख्या।

यद्यपि रचना, वृत्तिः, वर्णाश्च गुणाधीनाः तथापि वक्त्रौचित्यात्, वाच्यौचित्यात्, प्रबन्धौचित्याच्च क्वचित् अन्यथा भावो भवति रचनादीनाम्। तत्र वक्त्रौचित्याद् यथा —

मन्थायस्तार्णवाम्भः प्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्॥

अत्र वाच्यार्थे प्रशम रूपे प्रबन्धे च वेणीसंहार नाटके अपि दीर्घ समासा, उद्धता रचना, अभिनय प्रतिकूलत्वेन, दीर्घ समासेन अर्थ प्रतीतौ विलम्बात्वाच्च अनुचितैव, किन्तु वक्तात्र क्रोधी भीमसेनः, अतः तस्य औद्धत्य द्योतनाय उद्धता रचना कृता।

वाच्यौचित्याद् यथा-

सूर्य्याधूयमान घनदमरधुनीलोल कल्लोलजालो-
द्भूताम्भः क्षोदमात्प्रथमफणिगणः छिद्रलक्ष्मच्छलेन।
ऊर्ध्वं न्यस्ताङ्घ्रिदण्डभ्रमिभररभसोद्यन्नरवत्प्रकोप-
भ्रान्तिब्रह्माण्डखण्डं प्रवितरतु शिवं शाम्भवं ताण्डवं वः॥

अत्र मृदु प्रकृतिः सूत्रधारो वक्ता, प्रबन्धश्च नाटकः। तत्र दीर्घ समासमयी उद्धता रचना नोचिता। किन्तु अत्र लोक संहारकस्य शम्भोः उद्धतं ताण्डवं वाच्यम्। अतः तादृशस्य उद्धतताण्डवस्य प्रतिपादनाय या उद्धता रचना कृता सोचितैव।

प्रबन्धौचित्याद् यथा नाटकादौ रौद्रेऽपि अभिनय प्रतिकूलत्वेन न दीर्घ समासादयो निबध्यन्ते। एवमाख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः, किन्तु विकटबन्धत्वमेव गद्यप्राधान्यात् गद्ये च विकटबन्धस्यैवौचित्यात्। अपि च तत्र वक्ता कविर्भवति न तु रागी, कोमला रचना च रागीमुखादेव शोभते। कथायां रौद्रेऽपि नात्यन्तम् उद्धताः रचनादयो विधीयन्ते, यतो हि तत्र वक्ता क्रोधाविष्टो न भवति वर्णनीयस्य पूर्वं प्रतिपत्तेरेवोद्देश्यत्वात्। एवम् अन्यदपि औचित्यादि अनुसर्तव्यम्।

उपेन्द्र झा
4/7/20
सहा० प्रो० साहित्य
रा० उ०सं० महाविद्यालय
ध्रुवगंज, पूर्णियाँ